Shri Raghunath Temple MSS. Library,
JAMMU

No. ९५५९

Title बाध बुद्धि प्रतिबध्य प्रतिबन्धक भाव:

Author श्री हरिराम भट्टाचार्य

Extent ६ Age x

Subject न्यायशास्त्रं

बाधबुद्धिप्रतिबध्यप्रतिबन्धकवादः

१५५५९ पत्राणि ७

ॐ श्रीगणेशाय नमः ॥ तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तत्तद्धर्मावच्छिन्नविशेष्यताकतद्विशिष्टबुद्धेरनुदयात् पर्वतत्वावच्छिन्नविशेष्यताकसंयोगादिसंसर्गकवह्नित्वाव-
च्छिन्नप्रकारताकालौकिकज्ञानत्वावच्छिन्नं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यताकादेशिकविशेषणतासंसर्गकसंयोगादिसंसर्गावच्छिन्नवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकाना-
हार्यप्रमात्वेनानास्कन्दितनिर्णयत्वेन प्रतिबन्धकत्वकल्पने पर्वतत्वावच्छिन्नविशेष्यताकतत्तदभाववत्तानिर्णयकाले ऽयधर्मावच्छिन्नविशेष्यताकतद्विशिष्टबुद्ध्युदयात् प्रतिबध्यता-
वच्छेदककोटौ पर्वतत्वावच्छिन्नविशेष्यताकत्वनिवेशः संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताभाववत्तानिर्णयकाले समवायादिसंसर्गकविशिष्टबुद्ध्युदयात् संयोगादिसंसर्गकत्व-
निवेशः अयःसंपृक्तसंयोगादिसंसर्गकज्ञानस्यापि संयोगसंसर्गकतया संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्तानिर्णयदशायां तदुत्पत्तिप्रसङ्गः किञ्चित्सांसर्गिकविषय-
तानवच्छिन्नसंयोगादिसांसर्गिकविषयताकत्वं निवेश्यं तदाहारणीयावच्छेदकावच्छेदेन वह्नित्वज्ञानानुत्पादप्रसङ्गः तत्र विशेष्यतावच्छेदकावच्छिन्नसंयोगादीनामेव संसर्गतया किञ्चित्सां-
सर्गिकविषयतानवच्छिन्नतासंयोगादिसांसर्गिकविषयकत्वाभावात् पर्वतत्वावच्छिन्नत्वानिरूपितसांसर्गिकविषयतानवच्छिन्नसंयोगादिसांसर्गिकविषयतानिवेशोपि कालिकविशे-
षणताविशिष्टसंयोगादिसांसर्गिकज्ञाने दुरुद्धरः इममेवेति चेन्न पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयताया वह्न्यादिप्रकारतानिरूपितसांसर्गिकविषयता-
भिन्नतयाः तदुपपत्त्यभावात् पर्वतोऽयं वह्न्यभाववान्निर्णयाद्विबाधनिर्णयकाले पर्वतो वह्निमानित्याकारकज्ञानोत्पादात् वह्नित्वावच्छिन्नप्रकारताकत्वनिवेशः आनुमानिकभिन्नलिङ्ग्यादिजन्यबाधव-
द्धिदशायां लौकिकसन्निकर्षजन्यविशिष्टबुद्ध्युदयात् लौकिकत्वनिवेशः अलौकिकत्वं च न सामान्यतो लौकिकसन्निकर्षजन्यभिन्नत्वं प्रसंयोगे लौकिकवह्न्याद्युपनीतभानापत्तेः इष्टप्रसङ्गात्
किन्तु वह्न्यादिविषयलौकिकसन्निकर्षजन्यभिन्नत्वं वह्न्याद्यनुभाववत्तानिर्णयप्रतिबध्यतावच्छेदककोटौ निवेश्यम् न च चक्षुःसंयोगत्वक्संयोगसाधारणस्य लौकिकत्वस्य दुर्वचतया कथं लौ-
किकसन्निकर्षजन्यभिन्नत्वस्य तत्त्वमिति वाच्यम् वह्न्यादिसंयोगजन्यभिन्नत्वस्यैव तथात्वात् उपनीतभानस्य वह्न्यादिसंयोगजन्यत्वेन तदुपपत्त्यभावात् लौकिकसन्निकर्षजन्यज्ञाने उप-
नीतभानादिविषयताविलक्षणलौकिकविषयताभिन्नत्वं निवेश्यम् तत्र लौकिकसन्निकर्षजन्यभिन्नत्वं गौरवात् अयथालौकिकसन्निकर्षजन्यज्ञाने व्यभिचारवारणाय लौकिकत्वनिवेशो बा-
धकाले लौकिकसन्निकर्षजन्यसंशयापत्तिः न च संशयस्यार्थसमाजग्रस्तत्वात् पाकस्यचित् जन्यतानवच्छेदकत्वात् न स्यात्पादनमशक्यं तद्विशिष्टबुद्धित्वं निर्णायकमेकं ज्ञायते न एवेति तत्रैवा-
पत्तिरिति वाच्यम् संशयत्वस्य किञ्चिज्जन्यतानवच्छेदकत्वेपि प्रत्यक्षसामग्रीबलात् पर्वतत्वावच्छिन्नविशेष्यकवह्निविशिष्टबुद्धित्वस्यापि विधवत्त्वाभाववद्विशिष्टबुद्धित्वावच्छिन्नस्यापत्तेरेव फल-
तः संशयापत्तेः यत्र लौकिकसन्निकर्षजन्यसंशयसाधारणं लौकिकनिर्णयत्वमतत्त्वमेव बाधप्रतिबध्यतावच्छेदककोटौ निवेश्यम् न तत्र बाधकाले लौकिकसन्निकर्षजन्यसंशया-
पत्तिरिति तदसत् संशयसाधारणतादृशधर्मस्य बाधप्रतिबध्यतावच्छेदकत्वे पुरोवर्तिनि स्थले लौकिकसन्निकर्षादिसामान्यसामग्रीबलात् वह्निविशिष्टबुद्धित्वतदभावविशिष्ट-
बुद्धित्वावच्छिन्नोभयोर्बाधकाभावेन फलतः संशयापत्तेर्वारयितुमशक्यत्वात्तादृशसामान्यसामग्र्याश्च तादृशप्रतिबध्यतावच्छेदकानाक्रान्तस्य निर्णयस्यैव फलजनने बाधाभाव-
रूपविशेषसामग्रीविरहस्याकिञ्चित्करत्वात् निर्णयस्थले च विशेषसामग्र्यभावात् एतेन संशयलौकिकविषयताभ्युपगमेन लौकिकसन्निकर्षकालीनसंशयोपि लौकिकविष-
यताश्रयतानवच्छिन्नप्रतिबाधप्रतिबध्यतावच्छेदकाक्रान्त एवेति न बाधकाले तदापत्तिः अथ संशयलौकिकविषयतानभ्युपगमेन लौकिकसन्निकर्षजन्यत्वावच्छेदकानाक्रान्तत्वप्रसङ्गः
इति चेत्कानुपपत्तिः ज्ञानसन्निकर्षादेव तदुत्पत्तेः अत एव वह्न्यादिसन्देहानन्तरं वह्निं साक्षात्करोमीत्याकारसाक्षात्कारित्वग्रहः लौकिकविषयतायाः साक्षात्कारित्वव्यञ्जकत्वादिति तत्र
लौकिकसन्निकर्षादिकालीनसंशयस्य लौकिकविषयताश्रयत्वेन बाधकाभाव इति वाच्यम् तत्र लौकिकत्वावच्छिन्नप्रतिबन्धकोटिकसंशयसामग्र्याः प्रत्यक्षप्रतिबन्धकत्वकल्पनात् सं-
शयसामग्रीदशायां लौकिकविषयताशालिज्ञानसामग्र्यभावस्यैव बाधकत्वात् अयथालौकिकाभिविषयत्वे बाधप्रतिबध्यतावच्छेदकालौकिकसन्निकर्षजन्यसंशये च लौकिकालौकि-
कविषयताद्वयस्वीक्रियते अतो भवति सोपि बाधप्रतिबध्यः प्रकृते चेत्तदेवसर्वकल्पे लौकिकविषयताशालिज्ञानप्रति संशयसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवात् साक्षात्कारित्व-
ग्रहस्य प्रतिनिर्णयत्वेन हेतुत्वस्वीकारेण संशये साक्षात्कारित्वग्रहवारणसम्भवेन तादृशानुपपत्त्यभावात् संशयसामग्र्याः प्रतिबन्धकत्वकल्पनापेक्षया निर्णयत्वेन हेतुतायां लाघवस्यातिस्फुट ।

विशेषणीकारेणव ह्न्यादिविषयत्वे लौकिक विषयताकान्यत्वेना तांशे वह्न्यादि प्रकार तायां वा लौकिक विष यताः २३

पत्रे

निरूपित.

त्वादिमत्वादिकमप्यपास्तम् एतावतापि वह्न्यभावादिनिर्णयोत्तरं लौकिकसन्निकर्षादिघटितसामग्रीबलात् वह्न्यादिमानबाधकाभावेनार्थिकसंशयस्य दुर्वारत्वादिति चेन्न पर्वत
त्वावच्छिन्नविशेष्यतावह्न्यादिलौकिकप्रकारताशालिज्ञानं प्रति एवं तत्त्वावच्छिन्नविशेष्यतानिरूपितवह्न्यभावादिप्रकारताशालिज्ञानसामग्रीत्वेन प्रतिबन्धकताकल्पने एवं च वह्न्य
भाववत्तानिर्णयोत्तरं वह्नितदभावोभयसामग्रीकाले वह्न्यादिलौकिकप्रकारताशालिज्ञानमात्रोदयानुपपत्तेः एतादृशप्रतिबन्धकस्य सत्त्वात् नाप्यलौकिकवह्न्यादिप्रकारताशा
लिज्ञानं तत्प्रतिबन्धकबाधबुद्धेः सत्त्वात् अतीन्द्रियतद्विषयताशालिज्ञानं तु लौकिकमेवेति तादृशोपपत्तिरित्यपि लौकिकसन्निकर्षजन्यत्वात् तस्य बाधबुद्धिसामान्यप्रतिबध्यतया तदिन्द्रिय
जन्यबाधकाले तदिन्द्रियजन्यज्ञानवारणाय लौकिकान्यत्वमनिवेश्य चाक्षुषादिविशिष्टबुद्धौ चाक्षुषादिबाधबुद्धेः एवमेव प्रतिबन्धकत्वे कल्पनीये पर्वतो न पीतः इत्यनेन श्वेतोरगत्वादिबा
धबुद्धिदशायामपि मुख्यविशेष्यकवह्न्यादिज्ञानादिदोषवशात् शङ्खः पीत इति भ्रमोत्पत्तेरनुपपत्तेः अतः तादृशदोषविशेषाजन्यत्वमपि बाधसामान्याभावावच्छेदकको
टौ निवेशनीयम् केचित्तु दोषविशेषजन्यज्ञाने लौकिकविषयताया एवाभ्युपगमात् अलौकिकत्वनिवेशेनैव व्यभिचारवारणसम्भवात् दोषविशेषाजन्यत्वस्य न प्रतिबध्यता
वच्छेदककोटौ प्रवेशः न च लौकिकसन्निकर्षजन्यत्वं विनैव तादृशस्य येन तदनुपादेयत्वात् कथं लौकिकविषयताशालित्वं तस्येति वाच्यम् लौकिकसन्निकर्षदोषविशेषस्यापि तादृशवि
षयतानियामकत्वाभ्युपगमात् न चैवमपि तज्ज्ञाने लौकिकसन्निकर्षस्य व्यभिचारस्तदवस्थ इति वाच्यम् तादृशदोषानन्तरं पीतं साक्षात्करोमीत्याकारकानुव्यवसायोदयेन तत्र तादृशविषयतायाः
प्रामाणिकत्वात् व्यभिचारवारणाय तादृशदोषविशेषजन्यत्वस्य कारणतावच्छेदककोटौ सन्निकर्षजन्यतावच्छेदककोटौ निवेशनीयतया प्रतिबध्यतावच्छेदककोटौ विशेषणतानव(
च्छेदकधर्मस्य विशेषणनिवेशात् इत्थं च वह्निमदिन्यादिबाधबुद्धेः पर्वतो वह्निमानित्यादिज्ञानविरोधिता कालिकसम्बन्धेन तदभाववत्तानिस्याद्विरोधितया दैशिकविशेषणतासम्
न्धेन निवेशः उद्देश्यतावच्छेदकसामानाधिकरण्येनावगाहित्वाबाधबुद्धेः तादृशविशिष्टबुद्धिविरोधित्वात् पर्वतत्वावच्छिन्नत्वीयसांसर्गिकविषयतावच्छिन्नत्वे विशेषणतावि
शेषीयसांसर्गिकविषयताया निवेशनीयम् एवं च पर्वतत्वावच्छिन्नविशेष्यतायाम् अहं नस्तत्त्वावच्छिन्नविशेष्यताकबुद्धौ संसर्गतानभ्युपगमे पर्वतत्वावच्छिन्नत्वविशेषणतानि
वेशनीयं प्रयोजनाभावात् किंतु पर्वतत्वावच्छिन्नविशेष्यतावगाहित्वादिरूपपरम्परासम्बन्धावगाहित्वान्नारणाय विशेष्यतानिरूपितत्वमात्रं तादृशविशेषणताविशेषीयसांस(
र्गिकविषयतायां निवेशनीयम् तत्त्वतो वाच्यं पर्वतत्वव्यापकत्वविषयतायां निवेशे पुनः पर्वते तदभावप्रतियोगितावच्छेदकताभाववत्त्वावगाहित्वात् ततः संसर्गः तादृशज्ञानस्य
पर्वते तदभावप्रतियोगितावच्छेदकत्वाभाववत्त्वव्यापकत्वावगाहित्वात् एवं पर्वतत्वादिना महानसादिकमेव संसर्गघटकतया भासते तथापि संसर्गः इति पर्वतत्वावच्छिन्नसांस
र्गिकविषयतावच्छिन्नायां विधेयतासांसर्गिकविषयताया एवं रीत्या व्यापकतावच्छेदकपदार्थघटितविषयता प्रवेशनीया इत्थं च तादृशसांसर्गिकविषयताया विशेष्यतायाश्च पर्वतत्वा
वच्छिन्नत्वनिवेशे परस्परविलक्षणप्रकाराभावे गौरवप्रसङ्गेन तन्निवेशात् निषेधः पर्वतत्वावच्छेदेन वह्न्यभाववत्त्वनिर्णयस्य पर्वतत्वसामानाधिकरण्येन विशिष्टबुद्धिं प्रति विरोधितया
पर्वतत्वव्यापकधर्मावच्छिन्नत्वं तादृशसांसर्गिकविषयतायां निवेशनीयम् न चैवं सामानाधिकरण्येनावगाहिवह्न्यभाववत्ताज्ञानस्य एतादृशप्रतिबन्धकतावच्छेदकतानाक्रान्त
यातादृशज्ञानदशायामवच्छेदकावच्छेदेन वह्न्यादिविशिष्टबुद्ध्यापत्तिरिति वाच्यम् अवच्छेदकावच्छेदेन वह्निविशिष्टबुद्धिं प्रति सामानाधिकरण्यावगाहिबाधनिर्णयस्य प्रतिबन्धकत्वान्तरस्य कल्प
नीयत्वात् संयोगादिसांसर्गिकविशिष्टबुद्धौ समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्तानिर्णयस्य वह्निमत्तादिना वह्न्यादिविशिष्टबुद्धौ वह्नित्वादिरूपसामान्याभाववत्ताया विरोधितया सं
योगादिसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकत्वनिवेशः इत्थं तत्त्वावच्छिन्नाभाववत्तानिर्णयस्य तत्तदभावव्याप्यवत्तानिर्णयस्य तत्तदभाववत्तानिर्णयमुद्दिश्य एवं वह्नित्वादिना वह्न्यादिवि
शिष्टबुद्धिविरोधिता न च महानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभाववत्ताया अपि वह्नित्वावच्छिन्नतया महानसीयवह्न्यभाववत्ताकाले ज्ञानस्यापि वह्निमानित्याकारकज्ञानविरोधितापत्तिरि(
तिवाच्यम् वह्नित्वावच्छिन्नत्वं वह्नित्वातिरिक्तधर्मानवच्छिन्नत्वपर्यवसितत्वात् न च वह्न्यभाववत्तादिना तदभावावगाहिनो ज्ञानस्य वह्न्यादिविशिष्टबुद्धिं प्रत्यविरोधित्वप्रसङ्गः तत्र वह्नित्वावच्छि
न्नप्रतियोगिताकाभावप्रकारकत्वादिति वाच्यम् वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वांशसंसर्गावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारताया एव प्रतिबन्धकतावच्छेदकत्वात् तादृशप्र

बछिना

कारतापर्याप्तिभ्रमात्मकत्वाघटकहेत्वाभासत्वादर्शाभावादनवगाहित्वेऽपि न क्षतिः वह्नित्वावच्छिन्नतया ह्रदत्वावच्छिन्नप्रतियोगितायां संसर्गेण यावत्तावदभ्युपगमे तत्तज्ज्ञाने तद्वद्विषयता
वच्छिन्नविषयतावच्छिन्नप्रतियोगित्वविषयतात्वेनैव नाशप्रतियोगित्वविषयतानिवेशनीया न त्वेवं तत्तद्वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वविषयतात्वेन ज्ञानत्वेन कम्बुग्रीवादिमत्त्वाव-
च्छिन्नप्रतियोगिताकाभावप्रसिद्ध्यापि कम्बुग्रीवादिमत्त्वादिगुणादिविशिष्टबुद्धौ कम्बुग्रीवादिमान्नास्तीत्याकारकबाधबुद्धिप्रतिबन्धकतायां नावपपत्तिः नन्वेवं ह्रदत्वावच्छिन्नप्रतियोगिताया
वकम्बुग्रीवादिमत्त्वविषयतावच्छिन्नावच्छिन्नविषयतावच्छिन्नत्वाभ्युपगमात् ग्राह्याहार्यबुद्धेरविरोधितया आहार्यत्वनिवेशः नचाहार्यज्ञानस्यापि विरोधितया अवश्यमनाहार्यत्वनिवेशस्तत्र
चाप्रमात्रग्राहार्यज्ञानस्याविरोधित्वेऽप्यात्मनस्तु विवेकः ------ प्रतियोग्यारोपरेवत्वात् एवं नाहार्यारोपस्य रेवत्वात् एवापि तस्य हार्यज्ञानस्य विरोधितया तस्य दित्याशङ्क्याहार्य
स्याभावबुद्धेः प्रागसम्भवादित्यनेन तन्त्वहत्वात् एवं स्याद्दीधितिकारस्याप्यसङ्गतेः न वा पत्तेः प्रयकिं तावदाहार्यज्ञानत्वं वह्न्यभावादिबुद्धेः न तावदस्य वह्नित्वेनैव तात्त्विकसम्बन्धेन वह्न्यादिनि
र्णयत्वं वह्निव्याप्यवत्ताकालीनेच्छाधीनवह्न्यभाववत्ताज्ञानस्यानाहार्यत्वापत्तेः नापि तादृशसम्बन्धेन वह्न्यभाववत्ताज्ञानविरोधिज्ञानत्वं तमिच्छाविरहविशिष्टवह्न्यादिमत्ताज्ञानस्यैव वह्न्यभाव-
दिमत्ताज्ञानविरोधितया इच्छाकालीनवह्न्यादिमत्ताज्ञानस्य तथात्वे नाहार्यज्ञानस्यापि विरोधित्वात् वह्न्यभावात् ऐतेन ज्ञानप्रतिबन्धकतायामिच्छायामुत्तेजकतया इच्छाकालीनज्ञानस्यापि प
रोक्षवह्न्यभाववत्ताज्ञानविरोधित्वात् तदुपपत्तिरिति वेदेव मपि बाधनदभाववद्व्याप्यवत्ताज्ञानविघटनामवच्छेदकभेदेन भिन्नानां विरोधितानामनुगमकरूपाभावेनानुगतरूपेणानिवेशान मुख्यकामेव।
नच बाधतदभावव्याप्यवत्ताज्ञानकालीनाहार्यज्ञानसाधारणानुगताहार्यत्वं तत्वेऽपि प्रमाप्रामाण्येऽतत्त्वान्यस्कन्दितवह्निमत्तानिर्णयविशिष्टत्वं ताद्दृशतदभावव्याप्यप्रकारकनिर्णयविशि
ष्टत्वाद्यवच्छिन्नप्रतियोगिताकभेदकूटवत्त्वं प्रतिबन्धकतावच्छेदकत्वात् दोषरहितवाच्यम् एवमप्यानुमानिकबाधतदभावव्याप्यवत्ताज्ञानकालीनाहार्यज्ञानसाधारणालौकिकसन्निकर्षज
न्यज्ञानस्याविरोधितापत्तेः नाहर्शबाधादिविशिष्टलौकिकज्ञानभिन्नत्वनिवेशान्तदिन्द्रियजन्यबाधादिकालीनलौकिकसन्निकर्षजन्यज्ञानस्यापि स्वात्तन्त्र्येणानिवेशात्तु यथायत्रिरितिवेदेव
मप्याहार्यवह्न्यादिनिर्णयकालीनवह्न्यभाववत्ताज्ञानस्याविरोधित्वप्रसङ्गात् इयमेव न वाहार्यवह्निमत्तानिर्णयविशिष्टान्यत्वनिवेशात्तदोषः इति वाच्यम् वह्निमत्ताज्ञाननिष्ठाहार्यत्वस्याना
हार्यवह्न्यभावादिनिर्णयविशिष्टान्यत्वं पञ्चिताव्यविधस्य दुर्वचत्वात् तत्ताद्दृशानाहार्यत्वस्यैवनिवेशनीयत्वे तथात्वे च वह्न्यभाववत्ताज्ञानीयानाहार्यत्वघटितत्वेनान्योन्याश्रयप्रसङ्गान्मैव
नाहार्यानाहार्यत्वस्यैव निवेशनीयत्वे तथात्वस्य च वह्न्यभाववत्ताज्ञानीयानाहार्यत्वघटितत्वेनान्योन्याश्रयप्रसङ्गात् यत्राहार्यज्ञाने रेच्छाया हेतुत्वोपगमात् तदीयतासम्बन्धेनेच्छावत्त्वमेवाहार्य-
त्वमिति तदसत् इच्छाविरहविशिष्टा वेमिति तामसीतादिना भिन्नविषयकप्रत्यक्षादिकं प्रति प्रतिबन्धकत्वापत्तेस्तथा नाहर्शसामग्रीकालीनप्रत्यक्षतादीविलक्षणाया देतत्त्वापेक्षया वेन स्वीकारात्
एवमिच्छाजन्यतावच्छेदकं यदीच्छाविशिष्टवह्न्यभावादिप्रकारकप्रत्यक्षत्वं तदाबाधप्रत्यक्षकालीनेच्छाविशिष्टज्ञानस्यापि तदाकारकेच्छाजन्यत्वेनस्यापाद्याहार्यत्वप्रसङ्गः बाधविशिष्ट
स्यजन्यतावच्छेदककोटिप्रवेशेष्याहार्यवह्निमत्तानिर्णयकालीनेच्छाविशिष्टज्ञानस्यतथात्वे दुर्वारमिय्यनाहार्यवह्न्यादिमत्तानिर्णयविशिष्टज्ञानत्वं वह्न्यभावप्रत्यक्षेच्छाजन्यतावच्छेदकं वा
च्यम् तद्वह्निमत्ताज्ञाननिष्ठानाहार्यत्वमपि जन्यतासम्बन्धेनेच्छाविशिष्टभिन्नत्वरूपमेव निवेश्यम् नाहर्शज्ञानगोचरेच्छायाः प्रविकार्यतावच्छेदकानाहार्यवह्न्यभावादिनिर्णयविशिष्टवह्न्यादिम
त्तत्वं वाच्यम् अन्योन्याश्रयानुपपन्नतादवस्थ्यात् एवं च वह्निमत्ताज्ञाननिष्ठानाहार्यत्वज्ञानेन ह्रदविन्नधर्मावच्छेदेन वह्न्यभाववत्ताने च्छाजन्यत्वग्रहः तद्ग्रहे च न ह्रदविन्न वह्न्यभाववत्तानीयानाहार्य
त्वग्रहः तद्ग्रहे च न ह्रदविन्नधर्मावच्छेदेन वह्निमत्ताने च्छाजन्यत्वग्रहः तद्ग्रहे च न ह्रदविन्न वह्न्यभाववत्तानीयानाहार्यत्वग्रहः तद्ग्रहे च न ह्रदविन्नधर्मावच्छेदेन वह्निमत्ताने च्छाजन्यत्वग्रहस्तु इ-
तारएवमन्योन्याश्रयतादोषः इति यत्राहार्यवह्न्यभाववत्ताज्ञानादौ वह्न्यादेरपि भाने तत्र बाधाभावात् सर्वत्र संशयात्मकमेवाहार्यज्ञानमुप एवं च निर्णयत्वनिवेशेनैवाहार्यज्ञानवारणसम्भवात् मूलाहार्यत्व
निवेशणमेव नास्ति किंनिर्वचनायासेनेति तदसत् यत्र मिथ्येन्द्रियादिजन्यापेताद्दृशीमवच्छन्नभावप्रतिनिर्णयद्वितीये क्षणे वह्निमत्तानिर्णयो लौकिकसन्निकर्षजन्यस्तत्र तदत्वसंस्त्वाहा
र्यवह्न्यभावप्रत्यक्षे तन्नसवत्त्वेन वह्न्यभाववत्तानिर्णयत्वरूपप्रतिबन्धकसत्त्वेन वह्न्यभावासम्भवात् निर्णयात्मकस्यैवानाहार्यतानस्य सम्भवेनाहार्यत्वनिवेशस्यावश्यकत्वात् न चाहार्यव
ह्न्यभाववत्ताज्ञानमपि संभावनपदेवितिवाच्यम् इच्छायास्तेजकसत्त्वेन तदुत्पत्तौ बाधकाभावात् न च बाधप्रतिबन्धकतायामिच्छायास्तेजकत्वं स्वीक्रियते किन्त्विच्छाजन्यभिन्नत्वमेव प्रतिबध्यता

ग़ो॰ २ वच्छेदककोटौ निवेशने इच्छाप्रयुक्तमानावच्छेदकमिच्छाविशिष्टसंशयत्वमेवेत्यनपकर्षकोटिकत्वात्तस्य बाधप्रतिबध्यतावच्छेदकाक्रान्ततया न तदापकर्षकोटिकत्वात्स्वरूपत्वमर्दनीतिवाच्यम् ।
जन्यतयाप्रयोजकत्वस्य वादिरूपावच्छेदकभेदभिन्नत्वेनेच्छाजन्यत्वावच्छिन्नप्रतियोगिताकैकनिवेशासम्भवेन भेदकूटस्यैव निवेशनीयतया विनिगमनाविरहेण कार्यकारणभावबाहुल्यादि
दूषयाउत्तेजकत्वकल्पनस्यैवानावश्यकत्वस्थापितत्वात् उपदर्शितस्थले च भवसिद्धस्याहार्यत्वानस्यायलाघानर्हत्वाच्चेति नस्माहाहार्यत्वस्य दुर्वचत्वात् कथमनाहार्यत्वेन प्रतिबन्धकत्व
मिति चेदेवम् अनुगतानाहार्यत्वस्य दुर्वचत्वेऽप्यनाहार्यत्वानां तत्तद्व्यक्तित्वेन भेदकूटस्यैव प्रतिबन्धकतावच्छेदककोटौ निवेशनीयत्वात् केचित्तु आहार्यत्वे यावदप्रामाण्यं न गृ
ह्यते तावत्पर्यन्तमेव तद्विशिष्टबुद्धिविरहनाहार्यत्वस्य निवेशपरत्वान्नाद्यः अप्रामाण्यत्वानास्कन्दितत्वान्न स्याविरोधित्वया प्रामाण्यत्वानास्कन्दितत्वनिवेशः नच सामानाधिकर
ण्यविशेष्यतोभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावत्वम् भाविताना दिविषयकाप्रामाण्यग्रहकालीनस्य विरोधित्वोपपत्तये विशेष्यत्वनिवेशः विशेष्यता चाप्रामा
ह्रतंत्रा॰ ण्यप्रकारतानिरूपिता ग्राह्या ग्रहत्वान्तरीयाप्रामाण्यप्रकारकविषयीनस्य विरोधित्वोपपत्तये सामानाधिकरण्यनिवेशः तत्राप्रामाण्यत्वानास्य प्रतिबध्यकतावच्छेदककोटिनिवेशाग्राह्यार्थभेदकू भाव॰
टैः सहविशेषणविशेष्यभावे विनिगमनाविरहात् प्रसङ्गात् अप्रामाण्यग्रहात्मकत्वस्यनिवेशने येवोचितमितिवाच्यम् तथासत्यप्रामाण्यग्रहानास्कन्दितबाधबुद्धिदशायामपि प्रतिबारकत्व
यत्र प्रामाण्यग्रहस्तत्रातत्स्ववनप्रसङ्गात् अप्रामाण्यत्वानास्कन्दितबाधबुद्धिहीनी यत्र गो इत्यनास्कन्दितबाधबुद्धेः सत्त्वात् तदन्तरमप्रामाण्यग्रहत्वप्रकारस्य सत्त्वात् न हि दृशिष्टबुद्धौ
चेत्स नस्मान्नउत्तेजकत्वमावश्यकमेव अप्रामाण्यग्रहवदव्याप्यवृत्तित्वज्ञानस्याप्युत्तेजकत्वस्वीकरणीयम् अन्यत्र सम्बन्धे येन व्यभिचारः न च संशयत्ववारणाय वह्न्यादिप्रकार रकदह्मभाव
दिप्रकार कत्वस्य निवेशनस्य प्रतिबध्यकतावच्छेदककोटौ वह्न्यंशनिवेशनीयत्वया सम्बन्धात्मकवह्न्यभावादिबुद्धेर्वह्निप्रकारकत्वयातद्व्यतिरेकसम्बन्धात्मकविशिष्टबुद्धेर्व्यभिचार
इतिवाच्यम् विनश्यदवस्थाव्याप्यवृत्तित्वज्ञानजन्यसम्बन्धप्रतियोगिसंशयादिवारणाय सम्बन्धधारणस्याविरोधसंसर्गावच्छिन्नवह्न्यादिप्रकारतानिरूपितप्रतिबध्यकतावच्छे
दककोटौ निवेशनीयत्वात् सम्बन्धे व्यभिचारस्य दुर्वारत्वात् केचित्तु सम्बन्धयोग्यसम्बन्धे व्यभिचारवारणाय विरोधविषयतायाबाधभाव जन्यतावच्छेदककोटौ निवेशनीयोन्नप्रतिब
ध्यकतावच्छेदककोटौ व्याप्यवृत्तित्वज्ञानाभावः गौरवात् नैव संशयात्मकविशिष्टबुद्धेरेव प्रतिबध्यत्वमपपद्यते तन्न निश्चयस्याविरोधविषयकत्वादितिवाच्यम् निर्णयात्मकज्ञाने
पि वह्न्यभाववद्धदे संयोगादीनामेव संसर्गतयाभानाभ्युपगमेन तस्यापि विरोधिविषयकत्वात् न च प्रमात्मकनिर्णयस्याविरोधसंसर्गकत्वसम्भवेपि हृदे संयोगादिवृत्तित्वव्यापक
त्वावगाहिपरामर्शादिसत्त्वानुमितेर्विरोधावच्छिन्नसंयोगादिसंसर्गकत्वासम्भवेन बाधकालेतदुत्पत्तिरितिवाच्यम् ताहशानुमित्याद्यावपिबाधाभावादित्वसाहिरोधभानेबाधकाभावात्
नचविरोधावच्छिन्नसंयोगादिसंसर्गकानुमितौ तत्सम्बन्धेन व्यापकत्वावगाहिपरामर्शस्य हेतुतया तदभावे विरोधभानेबाधकरतिवाच्यम् तथाविधपरामर्शजन्यतावच्छेदककोटौ
व्यतिरेकानुमितौ व्यभिचारवारणाय पुनस्तथाविधपरामर्शाव्यवहितोत्तरत्वस्य वक्तव्यविशेषणीयतया वह्नेन्नरानुमितौ विरोधभावेनाहशाभावस्य किञ्चित्करत्वात् नचैवं हृदसंयोगादिसं
सर्गवृत्तित्वव्यापकत्वावगाहिपरामर्शात्तस्यानुमितौ बाधभावादिवलात्संयोगितासम्बन्धेऽपि संसर्गतयाभानप्रसङ्ग इतिवाच्यम् तेन सम्बन्धेन व्यापकताव्याप्यतावगाहिकालेतत्सं
सर्गकानुमितेरनुदयेन ताहशसंसर्गवृत्तित्वव्यापकत्वावगाहिपरामर्शमात्रस्यैव बाधाभावाद्विना संयोगितासम्बन्धसंसर्गकानुमितिजनकविशेषसामग्रीत्वाभ्युपगमेन ताहशपरामर्शादिस्य
त्तकाले तदापत्त्यसम्भवात् प्रत्युत हृदसंयोगादिवृत्तित्वव्यापकत्वावगाहिपरामर्शादपि विरोधावच्छिन्नसंयोगादिसंसर्गकानुमित्यभ्युपगमेनानुपपत्त्यभावात् नचहृदसंयोगादिवृत्ति
त्वव्यापकत्वावगाहिपरामर्शजन्यानुमितौ विरोधावच्छिन्नसंयोगादीनां संसर्गतयाभानाभ्युपगमे व्याप्यवृत्तित्वज्ञानकालीनविरोधसंसर्गकैककोटिकवह्न्याद्यनुमित्यनन्तरं तद्व्याप्यवृत्तित्व
ज्ञाननाशे हृदसंयोगादिव्यापकत्वज्ञानान्तरमेवमितिप्रसङ्गः हृदसंयोगपर्याप्तसांसर्गिकविषयतापर्यवसन्नहृदसंयोगसंसर्गसिद्धिप्रतिबध्यतावच्छेदकतयाविरोधावच्छिन्नसंयोगसं
र्गकानुमितेरलदप्रतिबध्यत्वादितिवाच्यम् ताहशपरामर्शजन्यविरोधावच्छिन्नसंयोगादिसंसर्गकानुमितौ हृदसंयोगादिपर्याप्तसांसर्गिकविषयतायाअस्वीकारात् ताहशानुमितौ हृ २
हृदसंयोगादिसांसर्गिकसिद्धिप्रतिबध्यत्वात् तेन नचैवं तथाविधविषयतायाबाधप्रतिबध्यतावच्छेदकत्वे व्याप्यवृत्तित्वज्ञानस्य न्यूनदशायामविरोधाविषयकत्वानवारणाय तत्राव्याप्यवृत्तित्व

मूल॰

ज्ञानहेतुता स्वीकरणीयेति गौरवमिति वाच्यम् अव्याप्यवृत्तित्वज्ञानाभावस्य प्रतिबन्धकतावच्छेदककोटिप्रवेशे प्रयोजनाभावादिति विशेषणविशेष्यभावे विनिगमनाविरहेण प्र
तिबन्धकप्रतिबन्धकभावबाहुल्यप्रसङ्गात् न दोषस्तत्र अव्याप्यवृत्तित्वज्ञानादेरनाहार्यत्वोचितत्वादित्याहुः तदसत् अव्याप्यवृत्तित्वज्ञानादिविषयकनिखिलसमुच्चयाभावस्येति ऽपि अभावा
भ्युपगमे तथाविधनिखिलतत्तदभावत्वेन प्रतिबन्धकतापत्तेः नचैतत्कस्यचिदिष्टमपीति अव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वमावश्यकमेवेति संक्षेपः तत्र संशये च मिथ्यादोषव्यभिचारवारणाय निर्णी
तत्वस्य प्रतिबन्धकतावच्छेदककोटिनिवेशनम् अथ निर्णयत्वं यदि पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यादिप्रकारतानिरूपकत्वं तदा ज्ञानत्वादिना वह्न्यादिप्रकारकज्ञानासङ्ग्रहः य
दि वह्न्यादिवह्नित्वावच्छिन्नप्रकारतानिरूपितवह्न्यभावाभाववत्त्वादिना वह्निकोटिकसंशयाभावबोधकत्वेनेति संशयस्यापि निर्णयत्वापत्तिरिति चेत् अत्र पर्वतो वह्निमान् वह्नित्वावच्छिन्नप्रकारताभाव
स्य वह्न्यभावाभाववत्त्वावच्छिन्नप्रकारत्वाभावस्य चानिवेशनात् तदुपपत्त्यभावात् केचित्तु पर्वतत्वादिना वह्न्यादिप्रकारकत्वे समानाधिकरणवृत्तित्वरूपनिरोधोऽनसंसर्गेण यथा भासते किं
तु वह्नित्वेन तदभावाभावत्वावच्छिन्नप्रकारकज्ञानमेव इत्थं च तादृशप्रकारत्वेन यथा तिरोधसंसर्गावच्छिन्नप्रकारत्वेन तन्मात्रमपि एकपदाभावेन विवक्षणीयमित्याहुः तथा वच्छेदकावच्छेदेन
विशिष्टबुद्धिं प्रति बाधनिर्णयस्य प्रतिबन्धकतायां कीदृशनिर्णयत्वेन विशेषणे यदि पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यादिप्रकारतानिरूपकत्वे नीलपर्वतो वह्निमान् वा पर्वतो वह्न्य
भाववानिति ज्ञानसङ्ग्रहः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितनिर्णयत्वविवक्षायां नीलपर्वतो वह्निमान्नवेति संशयस्यापि पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रकारताप्र
सङ्गात् प्रतिबन्धकत्वप्रसङ्गादिति चेत् तादृशप्रकारतासम्बन्धपर्वतत्वावच्छिन्नविशेष्यताकवह्न्यभाववज्ज्ञानस्य विरोधित्वे नानुपपत्त्यभावात् नचैवं सति नीलपर्वतो वह्न्यभाववा
निति नाहार्यानिर्णये पर्वतत्वावच्छेदेन वह्निमत्ताज्ञानप्रसङ्ग इति वाच्यम् नीलपर्वतत्वावच्छेदेन वह्निविशिष्टबुद्धेर्नीलपर्वतत्वावच्छिन्नविशेष्यताकबाधबुद्धेः प्रतिबन्धक
त्वेऽपि तत्त्वेनोपपत्तेः पर्वतत्वावच्छेदेन वह्निविशिष्टबुद्धिसाधारणस्य नीलानिर्णयत्वस्य तथापि पर्वतत्वादिक्रोडीकृतनवह्निविशेष्यतानिरूपितसंयोगावच्छिन्नप्रकारतानिरूपितत्वानु
नत्वस्य प्रतिबन्धकतावच्छेदकतापगमात् तत्र पर्वते नीलपर्वतो वह्न्यभाववानित्यादिबाधकाले पर्वतत्वावच्छेदेन वह्निमत्ताज्ञानस्यापि वारणसम्भवात् नच नीलपर्वतत्वव्यापकतापा
संसर्गतायास्तत्र पर्वतनिवेशनीयतया पर्वतत्वावच्छेदेन वह्निमत्ताज्ञानस्य तादृशव्याप्यकत्वानवगाहितया कथं तत्सङ्ग्रह इति वाच्यम् नीलपर्वतत्वस्याभावप्रतियोगितावच्छेदकधर्मवत्त्व
रूपनीलपर्वतत्वव्यापकतावच्छेदकपर्याप्तिनोऽनवगाहित्वात् पर्वतेन तादृशपर्वतत्वानवच्छिन्नवह्निज्ञानापत्त्यभावे विषयत्वेऽभेदप्रसक्त्यनिवृत्तेः पक्षतद्व्यापकत्वावगाहित्वा
नव्याप्यतादृशावच्छेदावच्छेदकाभावाप्रसिद्धेः नाहार्यत्वेन समानाधिकरणत्वाभावेन वह्न्यभावोभयकोटिकज्ञानस्य प्रतिबन्धिता प्रतिबन्धे वह्निनः संयोगादिसंसर्ग
वच्छिन्नवह्निप्रकारतायामन्यत्वमेव सामानाधिकरण्यावगाहित्वानपेक्षितत्वबन्धकतायां निवेशनम् एवं च पर्वतत्वसामानाधिकरण्येनापि वह्नितदवच्छेदेन वह्न्यभावं चावगाहमानस्य सं
शयस्य वारणाय सम्बन्धविशेषणतासम्बन्धकत्वमेव निवेशनीयम् अवच्छेदकावच्छेदेन वह्न्यभाववत्ताज्ञाननिरपेक्षसामानाधिकरण्यावगाहिज्ञानतनिषप्रतिबन्धकतावच्छेदककोटौ च संस
र्गांशोपर्याप्तिनिवेशात् नन्वतिव्याप्तितावच्छेदकस्यैवावच्छेदकत्वसामानाधिकरण्यावगाहिज्ञानसाधारणतया तावच्छेदकावच्छेदेन बाधकाले अवच्छेदकावच्छेदेन वह्निविशिष्टबुद्धिरिय
वधेयम् अथ बाधबुद्धिनिर्णयत्वेन प्रतिबन्धकतायां संशयोऽपि विनेयविशेषदर्शने प्रत्यक्षनिर्णयापत्तिः अग्राह्याप्रमानुपायित्वेन अप्रकारकनिर्णयत्वावच्छिन्नप्रतिसंशयसाधारणान
दभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वाप्रकल्पनात् नसंशयोऽपि निर्णयापत्तिः अयं पुरुषो नवेति संशयपदार्थापुरुषत्वव्याप्यकरादिमत्तानिर्णयसत्त्वे अयं पुरुष इत्यादिनिर्णा
यानन्तरविशेषदर्शनस्योत्तेजकत्वस्वीकरणीयम् तथापि तद्व्याप्यवत्तानिर्णयाभावविशिष्टतदभावप्रकारकज्ञानत्वेन प्रतिबन्धकतापर्यवसितसंशयोत्तरसंशयत्वमपि चावधार
णाय प्रतिबन्धतावच्छेदककोटौ निर्णयत्वनिवेशनम् नचैवं तदभावप्रकारकप्रत्यक्षत्वमतोऽन्ययोग्यतासंशयकालीनप्रत्यक्षबोधाय दोषव्यभिचारः आनुमानिकबाधकालेऽपि नैवविशेष
दर्शनं लौकिकसन्निकर्षजन्यतानियमात् नतु संनिहिते तत्र योग्यलौकिकत्वमपि निवेशनीयम् एवं च तन्निर्णयजन्यलौकिकप्रत्यक्षत्वावारणाय तत्प्रकारकचाक्षुषनिर्णयसाधारणं तद्वि
शेषप्रतिविशेषदर्शनाभावप्रकारकचाक्षुषत्वादितत्सम्बन्धपरामर्शमतिप्रतिबन्धकत्वस्वीकरणीयम् एवं चनिर्णयत्वप्रतिबन्धकतावच्छेदककोटौ निवेशनादिद्वयस्य लौकिकप्रतिबन्ध

ॐ
२

प्रतिबंधकत्वान्तरं न कल्प्यते प्रयोजनाभावात् परंतु बाधनिर्णयकाले संशयप्रयोजकबोधानुमित्यादिवारणाय लौकिकान्यनत्वप्रकारताशालिज्ञानत्वावच्छिन्नं प्रति तदभावप्रकारकनिर्णा-
यत्वेन प्रतिबन्धकत्वान्तरं कल्पनीयं बाधनिर्णयदशायां विशेषदर्शने सत्येव प्रमत्वनिर्णयस्य प्रामाण्यकत्वे तु प्रमत्वनिर्णयान्यत्वानवच्छिन्नमेव बाधनिर्णये प्रतिबध्यतावच्छेदकं संशयप्र-
धारणाप्रतिबन्धकतये वा बाधनिर्णयकाले प्रमत्वनिर्णयापत्तिवारणसम्भवात् न च विपरीतज्ञानस्य प्रत्यक्षायामप्रमत्वनिर्णये अनुमाने प्रमत्वनिर्णयान्यूज्ञानत्वावच्छिन्नापत्तिवि-
परीतज्ञानाभावरूपकारणाभावादिति वाच्यम् प्रमत्वनिर्णयसामग्रीदशायां प्रमत्वनिर्णयान्यत्वानवच्छिन्नानामात्र संशयसाधारणानुमितित्वावच्छिन्नसामग्रीविरहेणानटवच्छिन्नाप-
त्त्यभावात् अन्यथा कार्येषु तत्वालोकसंयोगादि संशयेपि जनकविरहदशायां कुत्र मनोयोगान्यमनदेहच समालोकास्थितिजनकसमवधानेन निर्णयोदयात् विशेषदर्शनवदालोकसंयोगजनकसम-
वधानादीनामपि तदिन्द्रियस्थलीयप्रतिबन्धकतानामनेजनकत्वे स्वीकार्यम् न चालोकसमवधानादीनामप्रजनकत्वं यत्रालोकसमवधानादीनामपि तदिन्द्रियस्थलीयप्रतिबन्धकताना-
मनेजनकत्वस्वीकार्ये न चालोकसमवधानादीनामप्रजनकत्वं यत्रालोकसमवधानादिसत्त्वेपि दूरत्वादिसंपृक्तः संशयस्तत्र विशेषदर्शनेनैव निर्णयापत्तिरिति वाच्यम् विपरीतज्ञान-
दशायां यदालोकसंयोगादिसत्त्वे निर्णयस्तत्रैव तद्व्यक्तित्वेनोत्तेजकत्वोपगमात् न च यत्रालोकाभावप्रयुक्तः संशयस्तत्र मालोकसमवधाने निर्णयस्तत्र तं प्रति तत्र विशेषदर्शनाविरोधः
प्रामाण्यग्रहाधीनो दूरत्वादिप्रयुक्तः पुनः संशयस्तदुत्तरं निर्णयापत्तिरेव निर्णयानुरोधेन त्वेतेजकतालोकस्यावालोकसंयोगस्य सत्त्वादिति वाच्यम् तादृशालोकसंयोगस्यापि मनस्त्वेनाव-
च्छिन्नस्योत्तेजकत्वोपगमात् आलोकसंयोगादीनां च स्वावच्छेदकावयवावच्छिन्नसंयोगवत्त्वचः संयुक्तमनःप्रतियोगिकविजातीयसंयोगाभावपरंपरासम्बन्धावच्छिन्नप्रतियोगिता-
काभावो विपरीतज्ञानसामानाधिकरण्यसम्बन्धेन निवेशनीयः अन्यथा विषयालोकसंयोगसमवधानदशायामपि समवायादिना तदभावस्यात्मनि सत्त्वेनापत्तिर्निर्णयानुदयप्रसं-
गात् अपवादकालोकसमवधानकालेनाम संयोगत्वानामेव समवायेनोत्तेजकत्वमनुपपन्नपदार्थान्तरसंयोगादिकमादाय विनिगमनाविरहस्याद्वयोः लघुत्वादिति चाहुः ॥ मि-
प्रामत्ते लौकिकान्यविशिष्टबुद्धित्वावच्छिन्नं प्रति विपरीतनिर्णयत्वेनैव विरोधितासंशयोत्तरं विना विशेषदर्शनं प्रमत्वनिर्णयापत्तिवारणाय च विपरीतज्ञानोत्तरप्रमत्वनिर्णयत्वावच्छिन्न-
प्रतिविशेषदर्शनत्वेनोत्तेजकतालोकस्यानविनैव विशेषदर्शनेन विपरीतज्ञानोत्तरप्रमत्वस्य योग्यतासन्देहानन्तरं ग्राहकबोधादेः संशयानन्तरं संशयोत्पादानन्तरमपि वारणाय विपरीतज्ञानो-
त्तरत्वप्रमत्वनिर्णयत्वादीनां कार्यतावच्छेदककोटि निवेशनेनैन्द्रियजन्यसंशयकाले विनैव विशेषदर्शनं लौकिकनिर्णयोत्पत्त्यालौकिकान्यत्वमपि निवेशनीयम् ॥ ऐन्द्रियकेति-
यजन्यसंशयकाले विना विशेषदर्शनं लौकिकनिर्णयवारणाय चालौकिकविपरीतज्ञानोत्तरं लौकिकनिर्णयत्वावच्छिन्नं प्रति विशेषदर्शनस्य हेतुत्वान्तरापत्तिस्वीकर्तव्यानि एवं च नन्वैन्द्रि-
च. यस्थलीयप्रतिबन्धकतामपि तत्कल्प्यते तदिन्द्रियजन्यबाधकाले कारणविरहेणैव लौकिकप्रमत्वनिर्णयापत्तिसम्भवात् सति च विशेषदर्शने तदिन्द्रियजन्यबाधनिर्णयेपि तदिन्द्रि-
यजन्यनिर्णयस्यैव सत्त्वादित्याहुः ॥ अत्रेदं विचारणीयम् संशयसाधारणलौकिकान्यविशिष्टबुद्धित्वावच्छिन्नं प्रति विपरीतनिर्णयत्वेन प्रतिबन्धकतामप्यभ्युपेयते स्वस्यैव किंत्व-
न्यतनिर्णयस्थले लघुतरविशेषदर्शनत्वेनोत्तेजकतानियममते उपाध्यायमते तु विशेषदर्शनाभावविशिष्टविपरीतज्ञानाभावत्वरूपगुरुधर्मेणेति विशेषः न चैतन्मते कारणतावच्छे-
दकगौरवसमत्वेपि विपरीतज्ञानाभाववृत्तित्वोत्तरत्वघटितगुरुतरविशेषदर्शनजन्यतावच्छेदकापत्तया लौकिकान्यप्रमत्वनिर्णयत्वस्यापि तादृशविपरीतज्ञानाभावजन्यतावच्छे-
कत्वे तु लघुतरशरीरतया नोपाध्यायमते गौरवावकाश इति वाच्यम् विशेषदर्शनस्योत्तेजकत्वमते प्रामाण्यग्रहाभावादिति विशेषदर्शनाभावस्य विशेषणविशेष्यभावे विनिगमना-
विरहेण कार्यकारणभावबाहुल्यप्रयुक्तगौरवस्य तु तत्रापि दुरुद्धरत्वात् न चाप्रामाण्यज्ञानास्कन्दितविपरीतज्ञानदशायां विशेषदर्शने प्रमत्वनिर्णयोदयेनाप्रामा-
ण्यज्ञानाभावविशिष्टविपरीतज्ञानोत्तरप्रमत्वत्वमेव विशेषदर्शनजन्यतावच्छेदकमिति उपाध्यायमते वाच्यम् एवं चाप्रामाण्यग्रहाभावविशिष्टविपरीतज्ञानोत्तरप्रमत्वत्वमेव प्रति- ३
विशेषदर्शनत्वेन विशेषदर्शनाभावविशिष्टविपरीतज्ञानोत्तरप्रमत्वेऽप्रामाण्यग्रहत्वेन वा हेतुतेऽत्र विनिगमनाविरहेऽपि वाच्यम् अप्रामाण्यग्रहस्य हेतुत्वे तदभावविशिष्टतादि-
विषयकाप्रामाण्यग्रहकालीनतद्विषयबाधबुद्धिदशायामपि नैव विशेषदर्शनं तादृशाप्रामाण्यग्रहवत्तानिर्णयापत्तेरविनिगमकत्वात् अप्यविशेषदर्शनं विना विपरीतज्ञा-

नरूपतया व्यभिचारवत्त्वादाहार्यनिर्णयोत्पत्त्यव्यभिचारवारणायैकविरुद्धविशिष्टविपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनत्वेन हेतुता वाच्या तथा च विशेषदर्श-
नाभावविशिष्टविपरीतज्ञानोत्तरप्रत्यक्षत्वे प्रतीच्छात्वेन हेतुतामादाय विनिगमनाविरहः निरस्त घटत्वेनाहत्य विनिगमनाविरहादित्याशयात् प्रविष्टेत्वं एवमपीच्छाभा-
ववि शेषदर्शनाभावानां परस्परविशेष्यविशेषणभावे विनिगमनाविरहेण यावन्तः कार्यकारणभावास्तदपेक्षया कार्यकारणभावबलाघवस्यानपायात् न च तादृशाभाववि-
शिष्टविपरीतज्ञानाभावस्यावच्छेदकस्य तद्घटितत्वेनैव हेतुतोपगमादिविनिगमनाविरहेण कार्यकारणभावबाहुल्यसम्भवनापीति वाच्यम् प्रभावस्य तद्घटितत्वेन हेतुतायाः सिद्ध-
त्वे विरुद्धत्वाज्ञत्वात् तादृशविपरीतज्ञानत्वत्वाद्यन्तराभावनामपि तत्र घटितत्वेन हेतुतामादाय विनिगमनाविरहप्रसङ्गात् वा यत्र मिश्रमतेपि विपरीतनिर्णयत्वेन प्रतिबध्य-
कतायां विशेषदर्शनस्योत्तेजकत्वमावश्यकम् अन्यथा विपरीतनिर्णयकाले विशेषदर्शनसत्त्वे तत्प्रतिबन्धकसत्त्वेन प्रत्यक्षनिर्णयानुदयापत्तेः न च तत्र विपरीतनिर्णये वि-
रहप्रत्यक्षत्वमुत्पन्नेन तत्र वह्निजन्यत्वमिति वाच्यम् तथा सति भ्रमोत्तरप्रत्यक्षत्वावच्छेदकविशेषदर्शनहेतुतायादीधितिकारेण भ्रमसंशयोत्तरप्रत्यक्षत्वे प्रति विशेषदर्शनस्य हेतुतामत-
मप्रत्ययादिग्रन्थेन कथनस्यासङ्गत्यापत्तेः न च प्रत्यक्षत्वावच्छेदकगुणाप्युपगमतात्पर्येणेति न दोष इति प्रत्यक्षनिर्णयाव्यवहितपूर्वत्वस्यैव विपरीतनिर्णयप्रतिबध्यतावच्छेदकतया पगमात् विपरी-
तनिर्णयदशायां सति विशेषदर्शने प्रत्यक्षोत्पत्तिसम्बोधकाभावात् एवं गुणाप्युपगमते प्रत्यक्षमिव संशयोत्पत्तिकाले प्रत्यक्षनिर्णयत्वावच्छिन्नं प्रति संशयस्यापि प्रतिबन्धकत्वे कस्य
नीयमिति विगोरवम् मिश्रमते तु विशेषदर्शनजन्यतायामेव विनिगमनाविरहेण विनिवेशात् विशेषदर्शनोत्तरकारणवत्तानन्तरं वह्निमत्त्वप्रसिद्धिःसम्भवति विशेषदर्शनरहिताया तु संशय-
बुद्धेर्न तद्वह्निमत्त्वमिति प्रत्येवं वह्न्युपाध्यायमतेपि तादृशविपरीतज्ञानाभावस्य कार्यकाले तत्रैव हेतुतोपगमात् संशयोत्पत्तिकाले प्रत्यक्षनिर्णयत्वावच्छिन्नापत्तिरिति वाच्यम्
एवमपि प्रमाणापेक्षानास्कन्दितसंशयोत्पत्तिकाले प्रमाणं एव वह्न्यभावविशिष्टविपरीतज्ञानाभावरूपकारणसत्त्वेन निर्णयत्वावच्छिन्नापत्तेर्दुर्वारत्वात् न च संशयोत्तरसंशयव्य-
भिचारवारणाय तद्भावविशेषकसामग्र्याः एव विशेषदर्शनत्वेनोत्तेजकत्वमुपेयते निर्णयत्वस्य जन्यतावच्छेदकत्वमिति निर्णयत्वावच्छिन्नापत्तिरिति वाच्यम् तथा सत्येतादृशगो-
त्वस्यैवाधिकात् अन्यथैकरूपव्याप्यस्य कार्यत्वं तत्प्रत्यक्षविषयत्वरूपेण वा निमित्तादिनाना विधविशेषदर्शनानामननुगततयैकहेतुतासम्भवति व्याप्तेरवच्छेदकभेदेन भिन्नतया प्रत्य-
क्षव्याप्यवत्ताज्ञानस्यानुगतत्वादिति विशिष्य हेतुता वाच्या तथा च परस्परजन्यप्रत्यक्षत्वे परस्परेषां व्यभिचारेण कथं हेतुता नन्वेकरूपवत्ताभाववत्तादिज्ञानविरोधिहेतुतया वि-
धर्मकत्वविशेषदर्शनानामननुगमः सम्भवतीति वाच्यम् विरोधिताया विरोधितावच्छेदकत्वेनिन याकारवत्ताज्ञानत्वादिविरोधितावच्छेदकभेदेन भिन्नभिन्नत्वादननुगमतादव-
स्थ्यात् एवं विनापि विशेषदर्शनमन्धकारादौ घटादिमतेरनाशोकसमवधानानुपीनिर्णयोत्पत्त्यव्यभिचारः विपरीतज्ञानविरोधितायास्तत्राधारत्वेपि विशेषदर्शनाद्वौ-
किकसंयोगादिसाधारणप्रतिबन्धकतावच्छेदकसम्बन्धेनैकस्य दुर्वचत्वात् न च विशेषदर्शनविरहस्थले प्रत्यक्षविपरीतज्ञानोत्तरप्रत्यक्षत्वविशेषदर्शनजन्यतावच्छेदकम् उप-
दर्शितस्थले चालोकसंयोगविरहप्रयुक्तमेव विपरीतज्ञानेन तद्विशेषदर्शनविरहप्रयुक्तमतोन व्यभिचार इति वाच्यम् विशेषदर्शनविरहप्रयुक्तत्वस्य दुर्वचत्वादिति चेन्न वि-
शेषदर्शनजन्यतावच्छेदकतावत्यादिनोत्तरत्वसम्बन्धेन विशेषदर्शनत्वेशिष्ट्यस्यविशेषणतया तत्राक्रान्ताविव्यभिचाराभावात् तथं च विपरीतज्ञाने वैशिष्ट्यमपि न निवेश्यते प्रयोज-
नाभावात् एवं न विपरीतज्ञानस्य प्रत्यक्षकाले विशेषदर्शनरूपकारणसत्त्वात् विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नापत्तिरनवद्याः कारणपदमित्यभ्रमते विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नप्रति
विपरीतज्ञानत्वेन हेतुता वाच्या एवं मात्रमनुमित्यादिविपरीतज्ञानसत्त्वकाले विशेषदर्शनवत्त्वात् चात्र च विपरीतज्ञानोत्तरत्वात् प्रतिनिर्णयत्वावच्छिन्नापत्तिवारणाय तत्र तत्र चाक्षुषत्व-
विपरीतज्ञानत्वादिना हेतुतानां कल्पनीयमिति विपरीतज्ञानस्य समनकार्यकारणभावानामाधिक्यमिति प्रत्युक्तम् विपरीतज्ञानोत्तरत्वस्य कार्यतावच्छेदककोटौ निवेशे तद्वह्निमत्त्व-
त्वाभावात् एवं विशेषदर्शनस्यापनीतभानसामान्यचात्वृष्यापर्यन्तादिभेदेन कारणतावाहुल्यमपि नास्ति लौकिकानन्तकार्यतावच्छेदककोटौ वा निवेशप्रलौकिकलौकिकसाधा-
रणविशेषदर्शनविशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनस्यैकहेतुत्वे चैव पत्तेः अथ विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनविशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनविशिष्ट

सामान्य प्रमात्वं

शेषदर्शनत्वेन हेतुत्वकल्पेऽपि विपरीतज्ञानकाले विना विशेषदर्शनं प्रमात्वनिर्णयापत्तेः सामग्रीबलादस्यैव ननु सामान्यसामग्र्या विशेषदर्शनरूपविशेषसामग्रीसमवहितायाएव फल
तजनकतया तां विना कथमापत्तिरिति वाच्यम् विशेषदर्शनं विनापि सामान्यसामग्र्या विपरीतज्ञानानन्तरं प्रमोत्पादेन विशेषदर्शनाद्यघटितसामग्र्याएव फलव्याप्यत्वस्वी
करणीयतया तादृशसामग्र्या विपरीतज्ञानकालेऽपि सत्वेनापत्तिसम्भवादिति चेन्न विपरीतज्ञानानन्तरं प्रति विपरीतज्ञानाभावस्यापि हेतुत्वोपगमात् विशेषदर्शनविपरीतज्ञाना
भावान्यतरविशेषसामग्रीसहकृतायाएव सामान्यसामग्र्याः फलोपधायकत्वोपगमेन विपरीतज्ञानकाले विशेषदर्शनासत्वेन तदन्यतराभावेनापादनासम्भवात् नचैवमप्यानुमानि
कविपरीतज्ञानेऽभ्रमलौकिकज्ञानत्वरूपहेतौ विपरीतज्ञानोत्तरत्वेन विपरीतज्ञानाभावजन्यतावच्छेदकानाक्रान्ततया विशेषदर्शनोत्तरत्वेन च विशेषदर्शनजन्यतावच्छेदकानाक्रान्ततया चा
क्षुषादिविपरीतज्ञानकाले विशेषदर्शनमापत्तिरिति वाच्यम् चाक्षुषविपरीतज्ञानानन्तरं चाक्षुषप्रत्यक्षविपरीतज्ञानत्वादिना हेतुत्वोपगमात्तादृशफलस्य चाक्षुष
विपरीतज्ञानाभावजन्यतावच्छेदकाक्रान्ततया तादृशकारणविरहेण चाक्षुषादिविपरीतज्ञानकाले तदापादनासम्भवात् नचैवं विपरीतज्ञानाभावस्य सप्रकार्यकारणभावानां
मिश्रमतेऽप्यावश्यकतया लाघवात् ज्ञानत्वावच्छिन्नं प्रति वाच्यम् उपाध्यायमतेऽनादृशसप्रकार्यकारणभावे विशेषदर्शनाभावकूटनिवेशेनैकदेवतायाएव कल्पनेन लाघवस्यापायात् एतेन
कार्यतावच्छेदककोटौ विपरीतज्ञानान्तरत्वनिवेशप्रयुक्तगौरवमप्यकिञ्चित्करमेकतया यदरितोऽन्तरत्वस्य तु गतस्यैव च तथा तत्रैवाकिञ्चित्करमिति वाच्यम् अनुगतनिर्वचन
धर्मानेकत्रैतत्वादिति अथ वदन्ति विपरीतज्ञानोत्तरप्रत्यक्षे विशेषदर्शनहेतुत्वनाधिकं किन्तु पुरुषत्वाद्यवमित्येषु पुरुषत्वादिव्याप्यवत्त्वानिर्णयस्य हेतुतायाआवश्यकत्वात् तत्र
च तादृशनिर्णयविशिष्टस्य निवेशस्यावश्यकतया प्रयोजनाभावेनानुमितित्वानिवेशात्तादृशकार्यकारणभावेनैवोपपत्तेः तत्र तत्रानुमितित्वनिवेशस्यावश्यकः अप्रत्यक्षसि
द्धादिकालेऽपि तादृशपरामर्शजन्यतावच्छेदकाक्रान्तप्रमात्वतन्मात्रस्य भावासरकतमस्यफलव्याप्यतायाः स्वीकरणीयतया सिद्धिकालेऽनुमित्यापत्तिरिति वाच्यम् अनुमितित्वस्य जन्य
